Roll No............................
Signature of Invigilator .........

Paper Code

MV-301

# पतंजलि विश्वविद्यालय

## University of Patanjali

### Examination December - 2022

### एम. ए. व्याकरण, तृतीयसत्रम्

### व्याकरणम्, प्रथमपत्रम्

### संस्कृतव्याकरणम् (क)

समयः - होरात्रयम् पूर्णाङ्काः 70

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

( व्याकरणमहाभाष्यम् )

पृष्टेषु पञ्चसु त्रयः प्रश्नाः समाधेयाः। ( 3 x15 =45 )

1. "हेतुमति च" इत्यत्र भाष्यानुसारमाक्षेपसमाधानपूर्वकं हेतुमच्छब्दार्थविशेष्यता निरूपणीया।
2. सुप आत्मनः क्यच् इत्यत्र क्यजन्तस्य कारकाणि साधनानि महाभाष्यरीत्या निरूपणीयानि।
3. "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सूत्रस्य भाष्यसारं प्रतिपादनीयम्।
4. च्लि लुङि इति सूत्रं भाष्यानुसारेण वर्ण्यताम्।
5. "लटः शतृशानचावप्रथमासमानाधिकरणे" इति सूत्रं भाष्याशयमङ्गीकृत्य व्याख्येयम्।

पृष्टेषु अष्टसु पञ्च प्रश्नाः समाधेयाः। ( 5 x5 =25 )

6. 'लोहितादिडाज्भ्यः क्यष्' इत्यत्र ककारषकारयोः प्रयोजनं प्रतिपादनीयम्।
7. 'सत्यापेति' निपातननिरूपितभाष्याशयं व्याख्येयम्।
8. स्यतासी लृलुटोः इत्यत्र विकरणानामुत्सर्गापवादत्वं भाष्यानुसारं प्रतिपादनीयम्।
9. 'सर्वानुप्रयोग इति चेदशिष्यमर्थाभावात्' इति वार्तिकस्य प्रयोजनप्रत्याख्यानसमन्विता व्याख्या करणीया।
10. "कर्तरि भुवः खिष्णुच्खुकञौ' इति सूत्रं व्याख्येयम्।
11. "टित आत्मनेपदानां टेरे" इत्यस्य सूत्रस्य महाभाष्यानुसारं व्याख्या करणीया।
12. 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यस्य सूत्रस्य भाष्यानुसारेण वार्तिकानि व्याख्येयानि।
13. कृदतिङ् इत्यत्रातिङ्ग्रहणस्य प्रयोजननिराकरणभाष्याशयमुल्लेखनीयम्।

---------------x---------------